# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. THIRD SEMESTER EXAMINATION, DECEMBER 2015**

**SECOND YEAR [BATCH 2014-17]**

Date : 23/12/2015 **SANSKRIT [Gen]**

Time : 11 am – 2 pm **Paper : III** Full Marks : 75

1. यथेच्छं प्रश्नस्**यैकस्यो**त्तरं विधेयम्। [1×12]
   a) 'अभिज्ञान-शकुन्तलम्' इति नाटके वर्णितस्य हस्तिवृत्तान्तस्य नाटकीयतात्पर्यं व्याख्यायताम्। [12]
   b) शकुन्तलां प्रति कः कथम् अभिशापं प्रदत्तवान्? नाटके तस्याभिशापस्य प्रदाने किं तात्पर्यं विद्यते इति विशद्यताम्। [4+8]
   c) 'कालिदासस्य सर्वस्वमभिज्ञानशकुन्तलम्' - इति पङ्क्तिरालोच्यताम्। [12]

2. यथाभिमतं **चत्वारः** प्रश्नाः समाधेयाः। [4×2]
   a) अभिज्ञानशकुन्तलस्य नान्दीश्लोके उल्लिखिता अष्टमूर्तयः काः?
   b) 'आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः' — कः कं निगदितवान्?
   c) शकुन्तलायाः पितुः मातुश्च किं नाम?
   d) 'धर्मारण्यं प्रविशति गजः' — किं नाम धर्मारण्यम्? तत्र प्रविष्टस्य गजस्य वर्णना समुपस्थापनीया।
   e) दुष्यन्तस्य आश्रमप्रवेशकाले कण्वः किमर्थं कुत्र गतवान्?
   f) का आसीत् सानुमती? कथं सा राजोद्यानमागतवती?
   g) दुष्यन्तेन कथं ज्ञातं यत् आश्रमः सन्निहितः?

3. स्वाभिमतभाषायामनुवादः करणीयः यथेच्छ**मेकस्य**। [1×6]
   a) मुक्तेषु रश्मिषु निरायतपूर्वकाया निष्कम्पचामरशिखा निभृतोर्ध्वकर्णाः।
      आत्मोद्धतैरपि रजोभिरलङ्घनीया धावन्त्यमी मृगजवाक्षमयेव रथ्याः।।
   b) सरजिमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
      इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।

4. **एका** व्याख्या कार्या। [1×8]
   a) इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
      ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति।।
   b) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान् पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः।
      तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननान्तरसौहृदानि।।
   c) स्वप्नो नु माया नु मतिभ्रमो तु क्लिष्टं नु तावत्फलमेव पुण्यम्।
      असन्निवृत्त्यै तदतीतमेते मनोरथा नाम तटप्रपाताः।।

5. यथेच्छ**मेकस्य** भावसम्प्रसारणं क्रियताम्। [1×6]
   a) अर्थो हि कन्या परकीय एव।
   b) अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र।
   c) अविश्रमोऽयं लोकतन्त्राधिकारः।

**Or,**

यथेच्छं संक्षिप्तटीका**द्वयं** लेखनीयम्। [2×3]

भरतवाक्यम्, गान्धर्वविवाहः, विष्कम्भकः, कुलपतिः।

6. **एक:** प्रश्न: समाधेय:। [1×10]

a) दण्डस्योत्पत्तिविषये माहात्म्यविषये च मनोरभिमतं वर्ण्यताम्।

b) 'व्यसनानि दुरन्तानि' — व्याख्यायताम्।

c) मनुमनुसृत्य दुर्गनिर्माणस्य प्रयोजनीयता आलोचनीया।

7. यथेच्छ**मेको**ऽनुवाद: करणीय: स्वाभिमतभाषायाम्। [1×5]

a) एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम्।
कुलं दहति राजाग्नि: सपशुद्रव्यसञ्चयम्।।

b) अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभु:।।

c) अन्यानपि प्रकुर्वीत शुचीन् प्राज्ञानवस्थितान्।
सम्यगर्थसमाहर्त्तॄनमात्यान् सुपरीक्षितान्।।

8. **एका** व्याख्या करणीया। [1×6]

a) बालोऽपि नावमन्तव्यो मनुष्य इति भूमिप:।
महती देवता ह्येषा नररूपेण तिष्ठति।।

b) एवंवृत्तस्य नृपते: शिलोच्छेनापि जीवत:।
विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि।।

c) पात्रस्य हि विशेषेण श्रद्धधानतयैव च।
अल्पं वा बहु वा प्रेत्य दानस्य फलमश्नुते।।

**Or,**

टीका**द्वयं** लेखनीयम्। [2×3]

त्रयी, जाङ्गलदेश:, मनु:, आन्वीक्षिकी।

9. यथेच्छं प्रश्न**द्वय**स्योत्तरं विधेयम्। [2×2]

a) 'मनुसंहिता'-या रचयिता क: ? शास्त्रमिदं कीदृशम् ?

b) कीदृशं मित्रं प्रशंसायोग्यम् ?

c) का नाम त्रयी ?

d) राजाग्न्योर्मध्ये पार्थक्यं किम् ?

e) राज्ञ: श्रेष्ठधर्म: क: ?

10. **एकस्य** अनुच्छेदस्य अनुवाद: करणीय:। [1×10]

a) अस्ति गौतमस्य महर्षेस्तपोवने महातपा नाम मुनि:। तत्र तेन मुनिना काकेन नीयमानो मूषिकशावको दृष्ट:। तत: स स्वभावदयात्मना मुनिना तेन नीवारकणै: संवर्धित:। ततो बिडालस्तं मूषिकं खादितुमुपधावति, तमवलोक्य मूषिकस्तस्य मुने: क्रोडे प्रविवेश। ततो मुनिनोक्तम् - ''मूषिक! त्वं मार्जारो भव।'' तत: स बिडाल: कुक्कुरं दृष्ट्वा पलायते। ततो मुनिनोक्तम् - ''कुक्कुराद्बिभेषि? त्वमेव कुक्कुरो भव।''

b) तत्र एकेन धूर्तेन गच्छन् स ब्राह्मणोऽभिहित: - ''भो ब्राह्मण! किमिति त्वया कुक्कुर: स्कन्धेनोह्यते?'' विप्रेण उक्तम् — ''नायं श्वा किन्तु यज्ञच्छाग:।'' अनन्तरं पुन: द्वितीयेन धूर्तेन क्रोशमवस्थितेन तदेवोक्तम्। तदाकर्ण्य ब्राह्मणश्छागं भूमौ निधाय मुहुर्मुहुर्निरीक्ष्य पुन: स्कन्धे कृत्वा दोलायमानमतिश्चलित:।

———— × ————